वेड–धातवः

येभ्यः वा भवति इडागमः, ते धातवः वेटः— वा इट् वेट् | ३७ धातवः वेटः; तेभ्यः वलादि–आर्धधातुकप्रत्ययस्य विकल्पेन इडागमो भवति | यदा अजन्तसेड्धातवः च हलन्त–अनिड्धातवः च ज्ञाताः, तदा एषां वेड्धातूनां कण्ठस्थीकरणेन सम्पूर्णरीत्या इड्व्यवस्था सिद्धा |

**स्वरतिसूतिसूयतिधूञूदितो वा** (७.२.४४) इति सूत्रेण 'स्वृ शब्दोपतापयोः','षूङ् प्राणिगर्भविमोचने' अदादिगणे, 'षूङ् प्राणिप्रसवे' दिवादिगणे, 'धूञ् कम्पने' (स्वादौ क्र्यादौ च), अपि च येषाम् ऊकारस्य इत्संज्ञा, एभ्यः सर्वेभ्यः धातुभ्यः परस्य वलादेरार्धधातुकस्येड् वा स्यात् | (धेयं यत् तुदादिगणस्य धू विधूनने, चुरादिगणस्य च धूञ् कम्पने एतौ द्वौ सेटौ |)

| धातुः | तास् (लुट्) | तुमुन् | तव्यत् | स्य (लृट्) | स्य (लृङ्) |
|---|---|---|---|---|---|
| स्वृ | स्वर्ता | स्वर्तुम् | स्वर्तव्यम् | स्वर्ष्यति | अस्वर्ष्यत् |
| | स्वरिता | स्वरितुम् | स्वरितव्यम् | स्वरिष्यति | अस्वरिष्यत् |
| सू | सोता | सोतुम् | सोतव्यम् | सोष्यते | असोष्यत |
| | सविता | सवितुम् | सविव्यम् | सविष्यते | असविष्यत |
| सू | सोता | सोतुम् | सोतव्यम् | सोष्यते | असोष्यत |
| | सविता | सवितुम् | सविव्यम् | सविष्यते | असविष्यत |
| धू | धोता | धोतुम् | धोतव्यम् | धोष्यति / ते | अधोष्यत्/अधोष्यत |
| | धविता | धवितुम् | धविव्यम् | धविष्यति / ते | अधविष्यत्/ अधविष्यत |

धातुपाठे पठिताः ऊदिद्धातवः (२४ धातवः)

| | | | | | |
|---|---|---|---|---|---|
| तञ्चू | तङ्क्ता | तङ्क्तुम् | तङ्क्तव्यम् | तङ्क्ष्यति | अतङ्क्ष्यत् |
| | तञ्चिता | तञ्चितुम् | तञ्चितव्यम् | तञ्चिष्यति | अतञ्चिष्यत् |
| ओव्रश्चू | व्रष्टा | व्रष्टुम् | व्रष्टव्यम् | व्रक्ष्यति | अव्रक्ष्यत् |
| | व्रश्चिता | व्रश्चितुम् | व्रश्चितव्यम् | व्रश्चिष्यति | अव्रश्चिष्यत् |
| अञ्जू | अङ्क्ता | अङ्क्तुम् | अङ्क्तव्यम् | अङ्क्ष्यति | आङ्क्ष्यत् |
| | अञ्जिता | अञ्जितुम् | अञ्जितव्यम् | अञ्जिष्यति | आञ्जिष्यत् |
| मृजू | मार्ष्टा | मार्ष्टुम् | मार्ष्टव्यम् | मार्क्ष्यति | अमार्क्ष्यत् |
| | मार्जिता | मार्जितुम् | मार्जितव्यम् | मार्जिष्यति | अमार्जिष्यत् |
| क्लिदू | क्लेत्ता | क्लेत्तुम् | क्लेत्तव्यम् | क्लेत्स्यति | अक्लेत्स्यत् |
| | क्लेदिता | क्लेदितुम् | क्लेदितव्यम् | क्लेदिष्यति | अक्लेदिष्यत् |
| स्यन्दू | स्यन्त्ता | स्यन्त्तुम् | स्यन्त्तव्यम् | स्यन्त्स्यते | अस्यन्त्स्यत |
| | स्यन्दिता | स्यन्दितुम् | स्यन्दितव्यम् | स्यन्दिष्यते | अस्यन्दिष्यत |
| षिधू | सेद्धा | सेद्धुम् | सेद्धव्यम् | सेत्स्यति | असेत्स्यत् |
| | सेधिता | सेधितुम् | सेधितव्यम् | सेधिष्यति | असेधिष्यत् |
| गुपू* | गोप्ता | गोप्तुम् | गोप्तव्यम् | गोप्स्यति | अगोप्स्यत् |
| | गोपिता | गोपितुम् | गोपितव्यम् | गोपिष्यति | अगोपिष्यत् |
| | गोपायिता | गोपायितुम् | गोपायितव्यम् | गोपायिष्यति | अगोपायिष्यत् |
| त्रपूष् | त्रप्ता | त्रप्तुम् | त्रप्तव्यम् | त्रप्स्यते | अत्रप्स्यत |
| | त्रपिता | त्रपितुम् | त्रपितव्यम् | त्रपिष्यते | अत्रपिष्यत |

| | | | | | |
|---|---|---|---|---|---|
| कृपू | कल्प्ता | कल्प्तुम् | कल्प्तव्यम् | कल्प्स्यते | अकल्प्स्यत |
| | कल्पिता | कल्पितुम् | कल्पितव्यम् | कल्पिष्यते | अकल्पिष्यत |
| क्षमू | क्षन्ता | क्षन्तुम् | क्षन्तव्यम् | क्षंस्यति | अक्षंस्यत् |
| | क्षमिता | क्षमितुम् | क्षमितव्यम् | क्षमिष्यति | अक्षमिष्यत् |
| क्षमूष् | क्षन्ता | क्षन्तुम् | क्षन्तव्यम् | क्षंस्यते | अक्षंस्यत |
| | क्षमिता | क्षमितुम् | क्षमितव्यम् | क्षमिष्यते | अक्षमिष्यत |
| अशू | अष्टा | अष्टुम् | अष्टव्यम् | अक्ष्यते | आक्ष्यत |
| | अशिता | अशितुम् | अशितव्यम् | अशिष्यते | आशिष्यत |
| क्लिशू | क्लेष्टा | क्लेष्टुम् | क्लेष्टव्यम् | क्लेक्षयति | अक्लेक्षयत् |
| | क्लेशिता | क्लेशितुम् | क्लेशितव्यम् | क्लेशिष्यति | अक्लेशिष्यत् |
| अक्षू | अष्टा | अष्टुम् | अष्टव्यम् | अक्ष्यति | आक्ष्यत् |
| | अक्षिता | अक्षितुम् | अक्षितव्यम् | अक्षिष्यते | आक्षिष्यत |
| तक्षू | तष्टा | तष्टुम् | तष्टव्यम् | तक्ष्यति | अतक्ष्यत् |
| | तक्षिता | तक्षितुम् | तक्षितव्यम् | तक्षिष्यते | अतक्षिष्यत |
| त्वक्षू | त्वष्टा | त्वष्टुम् | त्वष्टव्यम् | त्वक्ष्यति | अत्वक्ष्यत् |
| | त्वक्षिता | त्वक्षितुम् | त्वक्षितव्यम् | त्वक्षिष्यते | अत्वक्षिष्यत |
| गाहू | गाढा | गाढुम् | गाढव्यम् | घाक्ष्यते | अघाक्ष्यत |
| | गाहिता | गाहितुम् | गाहितव्यम् | गाहिष्यते | अगाहिष्यत |
| गुहू | गोढा | गोढुम् | गोढव्यम् | घोक्ष्यति/ते | अघोक्ष्यत्/अघोक्ष्यत |
| | गूहिता | गूहितुम् | गूहितव्यम् | गूहिष्यति/ते | अगूहिष्यत्/अगूहिष्यत |
| गृहू | गर्ढा | गर्ढुम् | गर्ढव्यम् | घर्क्ष्यते | अघर्क्ष्यत |
| | गर्हिता | गर्हितुम् | गर्हितव्यम् | गर्हिष्यते | अगर्हिष्यत |
| तृन्हू | तृण्ढा | तृण्ढुम् | तृण्ढव्यम् | तृंक्ष्यति | अतृंक्ष्यत् |
| | तृंहिता | तृंहितुम् | तृंहितव्यम् | तृंहिष्यति | अतृंहिष्यत् |
| तृहू | तर्ढा | तर्ढुम् | तर्ढव्यम् | तर्क्ष्यति | अतर्क्ष्यत् |
| | तर्हिता | तर्हितुम् | तर्हितव्यम् | तर्हिष्यति | अतर्हिष्यत् |
| स्तृहू | स्तर्ढा | स्तर्ढुम् | स्तर्ढव्यम् | स्तर्क्ष्यति | अस्तर्क्ष्यत् |
| | स्तर्हिता | स्तर्हितुम् | स्तर्हितव्यम् | स्तर्हिष्यति | अस्तर्हिष्यत् |
| वृहू | वर्ढा | वर्ढुम् | वर्ढव्यम् | वर्क्ष्यति | अवर्क्ष्यत् |
| | वर्हिता | वर्हितुम् | वर्हितव्यम् | वर्हिष्यति | अवर्हिष्यत् |

*गुपू–धातोः आय–प्रत्ययः **गुपूधूपविच्छिपणिपनिभ्य आयः** (३.१.२८) इति सामान्यसूत्रेण नित्यः, तदा आर्धधातुके **आयादय आर्धधातुके वा** (३.१.३१) इत्येनन विकल्पेन |

**गुपूधूपविच्छिपणिपनिभ्य आयः** (३.१.२८) = गुपू, धूप, विच्छ, पण, पन, एतेभ्यः धातुभ्यः आय–प्रत्ययो भवति स्वार्थे |

**आयादय आर्धधातुके वा** (३.१.३१) = आर्धधातुक–प्रत्ययस्य विवक्षायाम् आय–आदयः प्रत्ययाः विकल्पेन भवन्ति |आयादौ त्रयः प्रत्ययाः अन्तर्भूताः— आय, इयङ्, णिङ् |

**रधादिभ्यश्च** (७.२.४५) = रध्, नश्, तृप्, दृप्, द्रुह्, मुह्, ष्णुह्, ष्णिह् इत्येभ्यः धातुभ्यः वलादेरार्धधातुकस्येड् वा स्यात् |

| | | | | | |
|---|---|---|---|---|---|
| रध् | रद्धा | रद्धुम् | रद्धव्यम् | रत्स्यति | अरत्स्यत् |
| | रधिता | रधितुम् | रधितव्यम् | रधिष्यति | अरधिष्यत् |
| नश् | नंष्टा | नंष्टुम् | नंष्टव्यम् | नंक्ष्यति | अनंक्ष्यत् |
| | नशिता | नशितुम् | नशितव्यम् | नशिष्यति | अनशिष्यत् |

| | | | | | |
|---|---|---|---|---|---|
| तृप्* | तर्प्ता | तर्प्तुम् | तर्प्तव्यम् | तर्प्स्यति | अतर्प्स्यत् |
| | त्रप्ता | त्रप्तुम् | त्रप्तव्यम् | त्रप्स्यति | अत्रप्स्यत् |
| | तर्पिता | तर्पितुम् | तर्पितव्यम् | तर्पिष्यति | अतर्पिष्यत् |
| दृप्* | दर्प्ता | दर्प्तुम् | दर्प्तव्यम् | दर्प्स्यति | अदर्प्स्यत् |
| | द्रप्ता | द्रप्तुम् | द्रप्तव्यम् | द्रप्स्यति | अद्रप्स्यत् |
| | दर्पिता | दर्पितुम् | दर्पितव्यम् | दर्पिष्यति | अदर्पिष्यत् |
| द्रुह् | द्रोग्धा | द्रोग्धुम् | द्रोग्धव्यम् | ध्रोक्ष्यति | अध्रोक्ष्यत् |
| | द्रोढा | द्रोढुम् | द्रोढव्यम् | ध्रोक्ष्यति | अध्रोक्ष्यत् |
| | द्रोहिता | द्रोहितुम् | द्रोहितव्यम् | द्रोहिष्यति | अद्रोहिष्यत् |
| मुह् | मोग्धा | मोग्धुम् | मोग्धव्यम् | मोक्ष्यति | अमोक्ष्यत् |
| | मोढा | मोढुम् | मोढव्यम् | मोक्ष्यति | अमोक्ष्यत् |
| | मोहिता | मोहितुम् | मोहितव्यम् | मोहिष्यति | अमोहिष्यत् |
| स्नुह् | स्नोग्धा | स्नोग्धुम् | स्नोग्धव्यम् | स्नोक्ष्यति | अस्नोक्ष्यत् |
| | स्नोढा | स्नोढुम् | स्नोढव्यम् | स्नोक्ष्यति | अस्नोक्ष्यत् |
| | स्नोहिता | स्नोहितुम् | स्नोहितव्यम् | स्नोहिष्यति | अस्नोहिष्यत् |
| स्निह् | स्नेग्धा | स्नेग्धुम् | स्नेग्धव्यम् | स्नेक्ष्यति | अस्नेक्ष्यत् |
| | स्नेढा | स्नेढुम् | स्नेढव्यम् | स्नेक्ष्यति | अस्नेक्ष्यत् |
| | स्नेहिता | स्नेहितुम् | स्नेहितव्यम् | स्नेहिष्यति | अस्नेहिष्यत् |

*तृप्, दृप् इत्येतौ द्वौ धातू तौ एव यौ अनिट्–हलन्तधातुपाठे उक्तौ— तृपँ प्रीणने दि प० (तृप्यति), दृपँ हर्षमोहनयोः दि प० (दृप्यति) | तर्हि कथम् अत्र वेट्–धातुषु अपि पठितौ ? एतौ द्वौ अनिट् अपि वेट् अपि | अनुदात्तौ अतः स्वभावतः अनिटौ; अयं स्वभावः आवश्यकः आसीत् येन **अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्** (६.१.५९) इत्यनेन अम्–आगमः विधीयेत | तदा **रधादिभ्यश्च** (७.२.४५) इति सूत्रेण तयोः इट् 'वा' (विकल्पेन) भवति | अतः अनयोः धात्वोः अनिट्त्वमपि अस्ति, वेट्त्वम् अपि अस्ति | (अस्य सर्वस्य दर्शनेन प्रकटमस्ति किमर्थम् अम्–आगमपक्षे इडागमसहितरूपं न भवति— अधस्थसूत्रेण धातुः अनिट् (अनुदात्तः) चेदेव अमागमो भवति; तदर्थम् अनिट्–धातुषु इमौ द्वौ धातू पठितौ | अपि च झलादौ प्रत्यये परे एव अमागमः विधीयते |)

**अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्** (६.१.५९) = उपदेशे अनुदात्तः यः ऋदुपधः तस्य अम्–आगमः विकल्पेन भवति झलादौ अकिति प्रत्यये परे |

**निरः कुषः** (७.२.४६) = निरः परात् कुषो वलादेरार्धधातुकस्येड् वा स्यात् |

| | | | | | |
|---|---|---|---|---|---|
| निर् + कुष् | निष्कोष्टा<br>निष्कोषिता | निष्कोष्टुम्<br>निष्कोषितुम् | निष्कोष्टव्यम्<br>निष्कोषितव्यम् | निष्कोक्ष्यति<br>निष्कोषिष्यति | निरकोक्ष्यत्<br>निरकोषिष्यत् |

एते ३७ धातवः वेटः |

<u>सेड्–धातवः</u>

अनिड्धातून् च वेड्धातून् च विहाय अन्ये सर्वे धातवः सेटः |

सेट्–हलन्तधातूनां रूपाणि एतादृशानि—

उपधायां लघु–इक्–वर्णः अस्ति चेत् तस्य गुणो भवति—

| | | | | | |
|---|---|---|---|---|---|
| लिख् | लेखिता | लेखितुम् | लेखितव्यम् | लखिष्यति | अलेखिष्यत् |
| कुप् | कोपिता | कोपितुम् | कोपितव्यम् | कोपिष्यते | अकोपिष्यत |
| वृष् | वर्षिता | वर्षितुम् | वर्षितव्यम् | वर्षिष्यते | अवर्षिष्यत |

उपधायां लघु–इक्–वर्णः नास्ति चेत् केवलं वर्णमेलनं भवति—

| | | | | | |
|---|---|---|---|---|---|
| वद् | वदिता | वदितुम् | वदितव्यम् | वदिष्यति | अवदिष्यत् |
| मील् | मीलिता | मीलितुम् | मीलितव्यम् | मीलिष्यति | अमीलिष्यत् |

Swarup — July 2019